# विश्वभाषा संस्कृतम्

श्री प्रतापकुमारः मेहेरः
शैक्षिक परामर्शदाता, संस्कृतविभागः, ओडिशाराज्यमुक्तविश्वविद्यालयः, भारत

## शोधसारांशः

संस्कृतं तावत् सर्वप्राचीनभाषा तथा मूलभाषास्ति। संस्कृतस्य शाब्दिकोऽर्थः पूर्णभाषा। संस्कृतं केवलं भाषैका नास्ति अपितु ज्ञानस्यानुसन्धानक्षेत्रे सामग्रीसंकलनाय एकः सुनियोजितमार्गः। आध्यात्मिकक्षेत्रात् प्रारभ्यः भौतिकक्षेत्रस्य प्रत्येकदिशायाः ज्ञानं लभते। संस्कृतभाषामाध्यमेन भारतवर्षे विज्ञानस्य समुद्भवः वहुप्रागेव संजातः । संस्कृतवाङ्मये विज्ञानस्य वहुविधरूपं प्रदर्शितमस्ति। यथा - गणितविज्ञानं, ज्योतिर्विज्ञानं, वास्तुविज्ञानं, कृषिविज्ञानं, वृष्टिविज्ञानं, राजनीतिविज्ञानं, पर्यावरणविज्ञानं भौतिकविज्ञानञ्च। विविधवैज्ञानिकशाखानामेतेषां वैज्ञानिकविवरणं संस्कृतेनैव बोभवीति। नानाविधक्षेत्रस्य विज्ञानवैभवमत्र विभ्राजते । तदर्थं प्रो. हरिदत्तशर्मामहाभागेन निगदितमस्ति यत् –

"One can be proud of the fact that Sanskrit is not merely a language, but a collection of knowledge, a vast treasure house of various disciplines like linguistics, mathematics, astrology, philosophy, religion, history, art, archeology, architecture and natural sciences like physics, chemistry, biology, botany, medical science, engineering, agriculture, horticulture, cosmology, ecology, aeronautics, navigation etc."[1]

भाषाणां वर्गीकरणमाधारीकृत्य विश्वस्य सर्वा अपि भाषाः खण्डचतुर्षु विभक्ताः परिदृश्यन्ते। तेषु युरेशियाखण्डं स्वतन्त्रं महत्वपूर्णञ्च। युरेशियाखण्डे विद्यमानानां भाषापरिवाराणां मध्ये भारोपीयभाषा परिवारः स्वप्रशस्त्यनुसारं सर्वत्र संचारितः तथा सुचित्रितः। स्वसत्तायाः महत्ववशात् सर्वत्र विराजिता इयं भाषा। प्रयोगाधिक्यं, भौगोलिकव्यापकत्वं, साहित्यिकोत्कर्षः, भाषावैज्ञानिकोत्कर्षश्चेत्यरूपेण महत्वस्यास्याः नैकविधकारणानि परिलक्ष्यन्ते । अस्याः परिवारस्य नाम आर्यपरिवारः, इण्डोजर्मनिकः भारत-हितीपरिवारश्च इत्यरूपेण विविधनामानि सुविदितानि इति भाषाविदुषां मतम् । सामान्यतः भारोपीयस्यार्थः भारतस्य तथा यूरोपदेशस्य। नाम भाषापरिवारोऽयम् एशियामहाद्वीपादारभ्य युरोपमहाद्वीपं पर्यन्तं विस्तीर्णोऽस्ति । एतस्मादेव भाषापरिवारस्यास्य नाम भारोपीयः। भाषाविज्ञानदृष्ट्या केन्तुम-शतमिति अस्याः भारोपीयभाषायाः वर्गद्वयं निराकृतमस्ति । शतम-वर्गे तावत् संस्कृतभाषा समायाति ।

[1]S.S.E.S. Page no.217


Volume 1, Issue 1, 2022, p. 61-75, ISSN 2583-6331
©Indira Gandhi National Open University

## भूमिका विवेचनश्च:

आनन्दस्य विषयो यत् अद्य संस्कृतस्य पुनरभ्युदयो जायते । राष्ट्रस्यास्य अक्षयनिधेः तथा अप्रमेयशक्तेः विश्वरूपं शनैः शनैः जनेषु सुष्ठु प्रतीयते । भाषाया अस्याः दिनानुदिनं गौरवं परिवर्द्धते । भाषामिमां प्रति अवहेलायाः भावोदूरीभवति । संस्कृतमद्य समग्रसंसारे कामधेनोः सदृशं विभाति । न केवलं भारतवर्षे अपितु अखिलविश्वमध्ये सुरभारतीयं प्रवर्तते इति । विविधानि विश्वसंस्कृतसम्मेलनानि/ World Sanskrit Conference (WSC) माध्यमेन विश्वस्य नैकविधदेशेषु संस्कृतस्योपरि अनुसन्धानकार्यं नितरां प्रचाल्यमानं वर्तते । अतःप्रो. हरिदत्तशर्मामहोदयेनापिप्रमाणीक्रियते –बृहत्तरं भारतभूविभागंव्याप्यैशिया-मण्डलमास्थिता या । (वैदे.म. 1/5)

नाम भारतवर्षमिति न अपितु एशियामण्डलमतिक्रम्य योरोपादि भिन्न महादेशेष्वपि सर्वत्र संस्कृतस्य स्थितिः विराजितास्ति । प्रादेशिकभाषा अप्यदानीं संस्कृतस्य बलेन सुसम्पन्नाः, समृद्धशीलाः तथा सम्बर्धिताः भवन्ति । विज्ञानस्य तथा आधुनिकजीवनस्य विविध व्यवसायोद्योगकलाकौशलादिषु संस्कृतस्य शरणमेवाभीष्टमार्गः ।

स्वतन्त्रताप्राप्त्यानन्तरं स्वगौरवमयमतीतं ज्ञातुं जनैः नितरां प्रोत्साहः परिवर्धते । भिन्नदेशं परिलक्ष्य भारतीया अपि पूर्वपुरुषाणां चारित्रिकसत्तां तथा स्वप्राचीनसंस्कृतस्य विषये ज्ञानार्थं सर्वदा चेष्टिताः सन्तीत्यनुमीयते । प्राचीनभारतस्य कला तथा विज्ञानस्य सम्मुन्नतदशा आसीदीति – विद्यमानेषु मूर्त्ति-चित्र-स्तम्भ-मन्दिर-स्तूप-विहार-दुर्ग-प्रासादादिषु स्पष्टं परिलक्ष्यते । अस्मिन् प्रत्नतात्विकवस्तूनि विद्यमानस्य स्वप्राचीनमितिहासस्य ज्ञानं संस्कृतसाहित्येनैव परिपुष्णाति । धार्मिक-सांस्कृतिक-सामाजिक-राजनीतिसमुच्चयं संस्कृतवाङ्मयस्यान्तर्गतम् ।

संस्कृतभाषा केवलं भारतवर्षे इति न अपितु वहिर्देशेष्वपि नाम समग्रविश्वे विकशितास्ति। अतः संस्कृतस्य कृते 'विश्वभाषा' इति आख्या प्रदीयते । अखण्डविश्वेनामजर्मन – हालैण्ड – फ्रान्स – आष्ट्रिया – मलेशिया – इटली – इण्डोनेशिया – सिङ्गापुर – मौरिशस – स्काटलैण्ड –इङ्गलैण्ड – अमेरिका – जापान – कम्बोडिया – थाईदेशेषु संस्कृतस्योपरि अनुसन्धानं प्रचलन्नस्तीति प्रो. हरिदत्तशर्मणा विरचतस्य वैदेशिकाटनमहाकाव्यस्य अध्ययनेन सुविज्ञायते । कविः स्वयमालोचितेषु षोडशदेशेषु भ्रमणं कृत्वा एकविंशतिसर्गात्मकं 'वैदेशिकाटनमहाकाव्यम्' अरचयत् । अत एव संस्कृतभाषा भारतात् वहिर्पि बहुलतया व्यवह्रियते। विदेशे नैकविधानुष्ठानेषु अस्याः भाषाया अध्ययनं, अध्यापनं तथा संस्कृतविषयककार्यक्रमाः कथं प्रचलिताः सन्तीति सर्वमपि विषयं महाकाव्येऽस्मिन् स्वानुभाविकशैल्या कविना वर्णितमस्ति ।

## योरोपमहादेशे संस्कृतम्

- **शर्मण्यां (जर्मनी) संस्कृतम्**

संस्कृतस्य स्थितिः केवलं भारतवर्षे न अपितु अखण्डविश्वे भाषाया अस्याः माहात्म्यं वरिवर्त्ती । समग्रविश्वे Africa, Antarctica, Asia, Australia, Europe, North America and South America – इत्यरूपेण सप्तमहादेशाः विद्यन्ते । एशियामण्डलस्यान्तर्गततया भारतवर्षं समायाति ।


Volume 1, Issue 1, 2022, p. 61-75, ISSN 2583-6331
©Indira Gandhi National Open University

भिन्नमहादेशेऽपि संस्कृतस्य स्थितिः का? भाषान्तरैः कथं संस्कृतस्याध्ययनं सुष्ठु कुर्वन्तीति? के संस्कृतग्रन्थाः वहिर् संरक्षिता ? संस्कृतस्योपरि शोधकार्यं कथं प्रचलतीति? एतत्सर्वमपि विषयं ज्ञातुं भारतशासनायोगेन (UGC) नियुक्तसंस्कृतज्ञाः निजदेशात् वहिर्दुरदेशं प्रयान्ति । संस्कृतग्रन्थानाम् अध्ययनेन भाषान्तरजनानामपि संस्कृतस्योपरि रुचिः ववृधे । येन विंशशताब्दपूर्वं वहिर्देशेषु अनेकानि प्राच्यविद्याकेन्द्राणि उद्घाटितानि । यत्र उन्नताध्यापनं तथा शोधकार्यादिकं प्रचलन्नस्ति । शर्मण्यदेशस्य बर्लिन-नगर्यां (Berlin) 'Hombolt University' विद्यमानोऽस्ति । अस्य विश्वविद्यालयस्य मध्यभागेषु ऐशियाकेन्द्रस्य अङ्गभूतो आर्यविद्याध्ययनो विभागः (Arya study centre, Department of South Asian Studies, Hombolt University) शोभते ।

फ्राञ्बापमहोदयस्या परं 'श्रीवेबर"पिशेलो' एवञ्च 'वाल्टेररूबेन' आदि सुविज्ञाः क्रमशः विभागस्यास्य सेवां चक्रुः। विभागेऽस्मिन् एतेषां समेषां संस्कृतविदुषां स्वस्वचित्रमाला क्रमेण सुसज्जिता वर्तते। मोर्गेनरोथमहोदयेनैव स्वशोधकार्यं तथा विश्वविद्यालयस्यास्य विभागस्य (Arya Study Centre) शिक्षेतिहासं सर्वमपि निगदितम् । शर्मण्य/जर्मनी इत्यत्र संस्कृतस्य का स्थितिः? एतत्सर्वमपि रोथमहोदय इति संस्कृतविद्वान कथितवान्। मोर्गेनमहोदयस्य वचनानुसारम् एतत्तु सिद्धं याति यत् – संस्कृतस्य स्थितिः समग्रसंसारे विद्यते इति न तु भाररतीया अपितु वैदेशिकाः च अनुबोभवाञ्चक्रुः। अनुसन्धानेन ज्ञायते Arya Study Centre, Department of South Asian Studies इत्यस्मिन् विभागे सुनिपुणाः तथा दक्षशिक्षकाः नियोजिताः बभूव। एशियाऽऽध्यापनस्य विज्ञवर्गो अतीव दक्षः, यः वर्गः भारतीयज्ञाननिधौ उपस्थितानां भाषा-कला-संस्कृति-दर्शनानि स्वपाठ्यक्रमे संयोज्य छात्रान् च पाठयति। तदा तत्र रोथमहोदय एव संस्कृतशिक्षकरूपेण नियुक्तोऽऽसीत् ।

हम्बोल्ट विश्वविद्यालयस्य (Hombolt University) एको राजकीयः ग्रन्थालयश्च विद्यते, यत्र नैकविधपुस्तकानि परिशोभितानि वर्तन्ते । तत्रैशियाऽऽफ्रीकन-भिन्नभागः वर्तते । विश्वविद्यालयेऽस्मिन् वहूनि संस्कृतपुस्तकानि प्रस्थापितानि सन्ति । अत्र पुरा रचनाकारैः बहूनि संस्कृतकाव्यानि नाटकानि च अनूदितानि सन्ति। अत एव जर्मन् इत्यत्रापि अनेके संस्कृतपण्डिताः शोभन्ते । ये स्वज्ञानेनैव नैकविधसमीक्षात्मकपुस्तकानां लेखनमकुर्वन् । जर्मन-संस्कृतज्ञाः संस्कृतस्य प्रत्येकस्मिन् क्षेत्रे नाम वेदे, पुराणे, धर्मशास्त्रे, दर्शने, व्याकरणे, राजनये साहित्ये च शास्त्रे सुनिपुणाः आसन् । अत एव उक्तविषयेषु तैः ग्रन्थान् विदध्युः । 'शोधं चिकीर्षुर्विषय-प्रपञ्चे'– इति वचनानुरीत्या तत्रत्यासु रचनासु तथा नाट्येषु वहु लोकत्वं संप्राप्यते । Hombolt University, Germany, इत्यत्र केवलं संस्कृतपण्डिताः, संस्कृतरचनाः तथा संस्कृतपुस्तकानि सन्ति इति न अपितु अध्यापनं च वेधेयमासीत् । तत्र 'संस्कृत-गीत-संन्ध्या' संञ्चालिता भवति । एतस्मादेव ज्ञायते यत् – एतेषां हृदि संस्कृतं प्रति कीदृशी भावना तथा प्रीतिः विराजितेति।जर्मनी-देशे जर्मन-प्राच्यनाम्नी German Oriental Society कापि संस्था विराजितास्ति। या संस्था शोधकार्यार्थं सिद्धा प्रसिद्धा च वर्तते। शोधकार्यार्थं प्राच्यविदः सदस्याः अत्रैवागत्य सम्मेल्य वहुधा चर्चां कुर्वन्ति ।


©Indira Gandhi National Open University

- **पूर्व-जर्मन्यां संस्कृतम्**

विदेशेऽपि (जर्मन्-इत्यत्रापि) भारतसङ्घो एको निर्मितोऽस्ति । सङ्घस्यास्य निमन्त्रणं स्वीकृत्य प्रो.हरिदत्तशर्मामहोदयः प्रवासि-भारतदेशीय बान्धवजनैः नवमित्रमण्डलैः सह मित्रतामकरोत् । तत्परं पूर्वजर्मन्याः केन्द्रस्थलं 'पोस्टडं' (Potsdam) प्रति गतः । जलाशये तथा लताद्रुमयोः पूर्णं निसर्गरम्यस्थलमिदम् । अत्र गृहस्य शालासु पुरा ग्रीक्कथाऽपि निवद्धास्ति । तत्र 'फ्रीडिश-राजकालिकीं' पुनश्च वहुचित्रवीथिकां सुमूर्तिमालां राष्ट्रिय-गैलरीं Nation Gallery (Berlin/Germany) अपि कविरयमपश्यत् । नाम बर्लिन (Berlin) इत्यस्य शिल्पकलापि अतीव समृद्धा इति तेन निराकृता । लाइप्जिग् (Leipzig) नामके पुरे संस्कृतव्याकरणस्योपरि क्रियमाणाः वहवः अनुवादग्रन्था अवलोकिताः संप्राप्यन्ते। 'सुवाइमारम्' इति नगरेऽस्मिन् चतुर्थविश्वसम्मेलनम् (4th World Sanskrit Conference) अभूत् । संस्कृतस्य अभूतपूर्वकल्पनापि विदेशे विराजितास्ति ।

- **पश्चिम-जर्मन्यां संस्कृतम्**

पश्चिमबर्लिने विद्यमानेषु पुस्तकालये विविधपाण्डुलिपियुतानि संस्कृतपुस्तकानि परिलक्ष्यन्ते । भव्यप्रकोष्ठेषु बहूनि पुस्तकानि सुसज्जितानि सन्ति। संस्कृतपाण्डुलिपीनां अधिष्ठात्री भवति । अत एव प्राच्यविशारदैः स्थलमिदं संस्कृतकेन्द्ररूपेण उद्घोषितम् । यथा वैदेशिकाटनमहाकाव्ये कथ्यते –

सुलिपि-लेख-सुसङ्ग्रह-संयुतं
विपुल-संस्कृत-केन्द्रमिदं कृतम् ।।[2]

'फ्री' नाम विद्यालयवर्ति तत्र संस्कृतकेन्द्रमेकं (Sanskrit Study Centre) वर्तते । अत एव संस्कृतसंभवाः विद्वांसः समुद्भवाः । अत्रैव देववाण्याः प्रभूतः प्रभावः दृश्यमानोऽस्तीति सिद्धं मतम् । देववाण्याः नव्यप्रयोगशैल्याम् अभिभूतजनैः नव्ययन्त्रमाध्यमेन देववाण्याः चमत्कारपूर्णप्रयोगाः कृताः वर्तन्ते । यन्त्रमाध्यमेन हस्तलेखादयः (Manuscripts) सम्पादिताः शोभमानाः च वर्तन्ते । पुनश्च अनेन यन्त्रेण समालोचनात्मकग्रन्थरत्नानि समारोपितानि । वैदेशिकानां प्रीतिः विपुला आसीत् ।

अभिरामे 'डौचविल्लेस्थले' सुभव्यं विश्वसेव्यं रेडियोजर्मनं शोभायमानमस्ति । स्थलमिदं भारतमतिरिच्य अवस्थितमिति प्रतिभाति । यतोहि स्थलेऽस्मिन् संस्कृतेन वाक्प्रसारः क्रियते। नाम यदा कदापि यत्र कुत्रापि देशे संस्कृतस्य विश्वसम्मेलनम् आयोज्यते, तदा पश्चिमजर्मन्याः डौचविल्लेस्थलं प्रति समागत्य विचारान् समादधन् आकाशवाण्यां प्रसारं विधीयते। तस्मात्परं 'क्लौन' समागत्य तत्र स्थितं भूम्यधस्ताज्जलस्रोतमपश्यत् ।

- **हालैण्ड इत्यत्र संस्कृतम् ( नीदरलैण्ड)**

देशस्यास्य लाइडिनपुरस्य लाइडिन विश्वविद्यालये (Leiden University) '7th World Sanskrit Conference' सम्मेलनं समायोजितम् ।

---

[2] वैदे.म. –३.११


©Indira Gandhi National Open University

- **पेरिस् नगर्यां संस्कृतम्**

पेरिसपुर्याः चाकचिक्यं सर्वत्र शोभते । 'मेजौं-द-स्याँसस-दलोम' (Maison Des Sciences De L'Homme) नामकम् उत्कृष्टं शोधयुतं मानवीयकेन्द्रमेकमस्ति । अत्र वहूनि मानवीयकन्द्राणि रम्यतया विभान्ति। एतेषु मानवीयकेन्देषु वैश्विकस्तरीयेषु नानाविधसामाजिकविषयेषु शास्त्राणि च उपलभ्यन्ते । तथा च भारतस्य विषयेऽपि विभिन्नविद्याः समुपलभ्यन्ते। तस्य मानवीयकेन्द्रस्य सप्तमतले भारतभुवोऽध्ययनस्य केन्द्रमेकं संस्थापितं वर्तते । यत्र वहूनि प्राच्यपुस्तकानि संप्राप्यन्ते।

वहुविषयै उपनिबद्धा 'पुरुषार्थः' नाम्ना पत्रिका च तत्र प्रकाशिता वर्तते । यस्यां पत्रिकायां भारतदर्शनस्य धर्मादिपुरुचतुष्टयविषयकं महत् स्थानम् उद्भाषितमस्ति । राष्ट्रियग्रन्थालयश्च वर्तते यत्र प्राच्यविद्यायाः वहूनि पुस्तकानि शोभन्ते । अत्र कठिनैरुपायैः संरक्षिताः सुरवाङ्-निबद्धाः नैकविषयाः परिदृष्टाः । कविः प्रो. हरिदत्तशर्मा स्वयमेव तत्र कविचन्द्रस्य नवचन्द्रिकायाः पाण्डुलिपिं प्राप्नोत् इति स्वमुखेन स्वरचितमहाकाव्ये प्रमाणीकरोति –

"लब्धा मयाऽपि कविचन्द्रकृता मनोज्ञा
काव्यस्य वै द्युतिकरी नवचन्द्रिका सा ।
इच्छा मया प्रकटिता नवपाण्डुलिप्यां
दत्तं सुखं तदनु फिल्मकृतं तु रूपम् ।। "[3]

1814 संवत्सरे प्रथमे फ्रांसमध्ये संस्कृतपीठमेकं संस्थापितमभूत् । अपि च आदिपुरुषो 'चेजी' अभिज्ञानशाकुन्तलस्य फ्रैञ्चभाषायाम् अनुवादमकरोत् । पेरिस् इत्यत्र 'Sorbonne University' विद्यमानोऽस्ति। विश्वविद्यालयेऽस्मिन् पुरा कालात् समारभ्यः एतावत् पर्यन्तं संस्कृतस्य पठनं पाठनं च प्रचलन्नस्ति । सिल्वान, लेवि, लुइरे, आर्मण्ड, लुडविक, ज्याँ-फिलियोज नामा वहवः संस्कृतज्ञाः तदा फ्रांसदेशे शोभन्ते स्म । वास्तुशास्त्रे 'डैगंसकः' इति नामक विद्वान् प्रसिद्धो आसीत्। 'बासाँबुदौ' भरतस्य नाट्यशास्त्रमधिकृत्य लिखति । एवं रूपेण विश्वविद्यालयेऽस्मिन् संस्कृतस्य महती श्रद्धा विराजितास्ति ।

- **आष्ट्रियायां संस्कृतम्**

1990 संवत्सरे "8th World Sanskrit Conference" आष्ट्रियादेशस्य राजधानीं वियेनां (Vienna) इत्यत्र संजातम् । भव्यं मेलनमपि संजातम् । तत्र बौद्ध-जैन-धर्मशास्त्र-तीर्थविद्या-रामायण-महाभारतानि वहूनि शास्त्राणि च चर्चितानि । सर्वेऽपि प्रतिभागिनो चर्चाया अनन्तरमागत्य विश्रान्तिगृहे सम्मिलन्ति । तदा तैः विद्यानिवासमहोदयस्य सभापतित्वे संस्कृतकाव्यगोष्ठी एका विनिर्मिता । यत्र कवीन्द्रैः स्व स्व कविताः सुश्राविताः । प्रतिभागिजनेषु संस्कृतप्रीतिः अभूतपूर्वा आसीत् । एकोनविंशे शतके (1900) वियेनायां संस्कृतस्य प्रारम्भ इति ज्ञातः । यतोहि वियेनास्थिते विद्यालये भाषायुतं दर्शनकं प्रवृत्तमास्ति । अत्र संस्कृतस्योपरि गहनं शोधकार्यं प्रचलन् अस्ति । आध्यात्मिकदर्शनशास्त्रविद्या विशेषरूपेण समुन्नता। अद्वैतवेदान्तस्य तथा वैष्णवधर्मस्योपरि विशिष्टबोधः परिलक्ष्यते । अपि च बौद्धः तिब्बतदर्शनञ्च प्रसारितं वर्तते। नाम सर्वत्र उत्कृष्टकेन्द्रेषु संस्कृतस्याध्ययनं शोधकार्यं च नितरां प्रचलति ।

---

[3] वैदे.म. – ५.१७


©Indira Gandhi National Open University

- **इटली इत्यत्र संस्कृतम्**

योरोपमहादेशस्य इटली-देशे 'गोरेशिया' नाम विद्वान् संस्कृतपीठमेकम् स्थापयाञ्चकार । अपि च रोमे, मिलाने तुरीने च नगरे संस्कृतस्य शिक्षणं प्रचलति । टूची, ग्नोली, बोकली चादि संस्कृतमनीषिण अपि बभूवुः । ओस्कारबटो नामक पण्डित इटलीदेशे 'Institute of Indology' इति संस्था स्थापयाञ्चकार । अस्य बोटोमहोदयस्य निर्देशनेन एव सुदेववाण्याः तथा इटलीभाषायाः द्वैभाषिको विस्तृतशब्दकोषः निर्मितः। यः संस्कृतज्ञानस्य प्रसाराय मुख्यमाध्यमोऽभूत् । तत्रत्यमनीषिवर्यैः इटालीभाषायां रामायणस्य काण्डादिनी अनुदितानि । देशेऽस्मिन् संस्कृतस्य नानाविधदिशासु नाम विधिशास्त्रे, तन्त्रशास्त्रे च सर्वासु विद्यासु शोधकार्यमभूत् । एतासु प्राच्यविद्यासु उच्चस्तरीयशोधकार्यकरणार्थं वैश्विकरूपयुक्ता CESMEO नाम संस्था एका अत्र विनिर्मितास्ति । अस्यां 'CESMEO'नामक संस्थायां शोधार्थिनां कृते प्राच्यबुधोपयुक्तः ग्रन्थालयोऽपि निर्मितोऽस्ति । इत एव 'Indological Taurinesia' नाम्नी वैश्विकी पत्रिका प्रकाशमायाति। देशेऽस्मिन् उच्चस्तरीया शोधचर्चा तथा सम्मेलनानि नितरां प्रचलन्ति। अत एव ख्री.पू. 2000 संवत्सरे अप्रैलमासे इटलीदेशस्यास्य तुरीन-नगरे '11th World Sanskrit Conference' अभूत् । सम्मेलनेSस्मिन् भिन्नसुधीभिरपि सभायामस्यां प्रशस्तिवाक्यानि च भाषितानि ।

- **स्काटलैण्ड इत्यत्र संस्कृतम्**

ख्री.पू. 2006 संवत्सरे जुलाईमासे 'स्काटलैण्डदेशस्य' (Scotland) राजधानीं ऐडिनबरा इत्यस्य 'एडिनबरा विश्वविद्यालये' (University of Edinburg) '13th World Sanskrit Conference' आयोडितम्। सम्मेलनेऽस्मिन् योगदानार्थम् अमेरिका-इङ्गलैण्ड-शर्मणी (जर्मनी)- फ्रान्स – इटली – डेनमार्क – फिनलैण्ड– सुहगरीभ्यः तथा थाई - कनाडा – भारतादिदेशेभ्यः विद्वांसः समागताः आसन् । वेदज्ञ – काव्यज्ञ – सुदर्शनज्ञाः तथा भाषावित्जनाः च समागताः । आस्ट्रेलियातः समागता 'विक्टोरियाख्या' युवती अपि सुरवागरतैका आसीत्। संस्कृतसम्भाषिणान् वैदेशिकान् दृष्ट्वा ज्ञायते कथं संस्कृतस्य प्रभावः विदेशे इति ।

सम्मेलनेऽस्मिन् शास्त्रचर्चा चलिता । अस्याः चर्चाया आयोजकः कुटुम्बशास्त्रीमहाभागो आसीत्। नैके बुधाः स्व स्व मतानि उपस्थापितानि । वर्गविशेषरूपेण सम्मेलनमिदम् आयोजितमभूत् । नैके आधुनिकाः कवीन्द्राः सरसं सुकाव्यं जगदुः ।पाश्चात्यमनीषिवर्याणामपि नव्ययुगीयकाव्यं प्रति प्रीतिः वहु आसीत् । नवभावपूर्णाः लयरागवद्धाः नवप्रयोगाः तैः मनीषिभिः प्रशंसिताः । इयं देवीस्वरूपा बाणी नित्यमेव जीवितास्ति। अत्याधुनिके संस्कृतकाव्ये इतोऽपि वर्धितभाजा भवति । त्रयोदशविश्वसंस्कृतसम्मेलनेऽस्मिन् सुविज्ञो ब्रोकिङ्टनो सचिवोऽऽसीत् । यः सर्वप्रबन्धतन्त्रम् अस्थापयत्। अस्य मेरी नाम्नी भार्या एव सहकर्मशीला सुसंस्कृतज्ञा । एषा सीताहरणस्य दिव्यं कारुण्यरूपम् आङ्ग्लवाचा प्रयोगं चकार । अत्र 'एडिनबराख्ये विश्वविद्यालये' (University of Edinburg) राष्ट्रियग्रन्थालयो एकोऽस्ति । यत्र वहूनि संस्कृतपुस्तकानि पाण्डुलिपयश्च संप्राप्यन्ते ।


©Indira Gandhi National Open University

- **लन्दने संस्कृतम्**

कविः स्काटलैण्डदेशस्य एडिनाबरा-नगरं प्रति गत्वा तत्रत्यसम्मेलनान्ते विमानमार्गात् सः लन्दनभुवि समागतः । इङ्लैण्डराष्ट्रस्य राजधानीं 'लन्दन' (London) नाम महापुरं मनोज्ञं भव्यं च भाति। अत्र कैम्ब्रिज् विश्वविद्यालयः (University of Cambridge), अक्सफोर्ड विश्वविद्यालयः (University of Oxford), लन्दन विश्वविद्यालयः (University of London), चेत्यरूपेण त्रयः प्रमुखाः विश्वविद्यालयाः। त्रिष्वपि विश्वविद्यालयेषु संस्कृतस्याध्ययनं नितरां प्रचलति । विल्सन – मोनियर – विलेमः – मैक्डानल – थामसको –वरो –विरेजुश्चादि संस्कृतविद्वांसः तत्र क्रमशः बभूवुः । 'India office, London' नाम्ना प्राच्यविद्यायाः समृद्धः ग्रन्थालयो एकोऽस्ति । ग्रन्थालयोऽयं संस्कृतविद्भिः संरक्षितोऽस्ति । अतः प्रोच्यते –

आसीत् प्रसिद्धः खलु प्राच्यविद्या-
ग्रन्थालयो ह्यत्र परः समृद्धः ।
यो हीण्डिया-आफिस-नामधारी
संरक्षितः संस्कृतविद्भिरेभिः ।।[4]

कैम्ब्रिजे (University of Cambridge) इत्यस्य संस्कृतपीठे पावेल – बैल – स्मिथ – नामधेयैः सुभारतीयैः पठिता तथा च सुशिष्यवर्गाणां कृते संपाठिता । 'लन्दन' इत्यत्र 'School of Asian and African Studies' नाम्नी संस्थास्ति, यत्र पूर्वं 'लिलीटर्नर' नामक विद्वान् परश्च अनेके पण्डिताः नियुक्ताः। स्नातकस्तरीयः पाठ्यक्रमः पुनः स्नातकात् परं शोधकार्यादिकम् अप्यत्र प्रचलति । 'लन्दने' संस्कृतस्य स्थितिः का? सर्वमपि ज्ञात्वा परं नगरस्यास्य भ्रमणमपि कृतम् । भ्रमणस्यास्यावसरे 'बङ्किघमं' नाम आङ्ग्लीयराज्ञः गौरवं कथं प्रतिष्ठितम्, सौवर्णकान्त्या रचितः प्रासादः, स्वर्णमूर्त्तिः, लन्दनस्य नन्दनकाननं, यात्रिणां वारिविहारदात्री 'देम्सनाम्नी' नदी अस्याः नद्याः तटे सुगोलं लन्दनलोचनं वा एवं कलाविलासैर्बहुचाकचिक्यैश्चमत्कृतं लन्दनस्य सौन्दर्यमभिभूतमस्ति ।

## एसिआ-महादेशे सस्कृतम्

- **थाई-संस्कृति-संस्कृतम्**

1998 संवत्सरे "भारतीय सांस्कृतिक सम्बन्ध परिषद्" (I.C.C.R) द्वारा नियुक्ताः सन्तः भारतीयसंस्कृतपण्डिताः नवथाइदेशं प्रति संप्रेषिताः । थाइदेशे अनेके भारतीयाः निवसन्ति । तस्मादेव 'थाइदेशः' लघुर्भारतभूमिभाग इव शोभते। अत्र 'शिल्पाकर्न विश्वविद्यालयो' (Slipakorn University) वर्तते । विश्वविद्यालयेऽस्मिन् नानाकलाशिल्पयोः शिक्षाव्यवस्था परिकल्पिता अस्ति। पुनश्च प्राच्यभाषाविभागः एकः कृतोऽस्ति । प्राच्यासु भाषासु संस्कृतं प्रमुखरूपेण वर्तते । पुरा कालात् अत्र संस्कृतस्य पठनं पाठनञ्च प्रचलन्नस्ति । संस्कृतस्य प्रवर्धनाय नवीनकेन्द्रमेकम् उन्मोचितमस्ति । केन्द्रेऽस्मिन् 'सत्यव्रत शास्त्रि' महाभाग आचार्यपदे अलंकृतोऽस्ति । कार्यालये

[4] वैदे.म. – १६.५


©Indira Gandhi National Open University

संस्कृतपाठकेन्द्रं (Sanskrit Study Centre) शोभायमानं विद्यते । केवलं नाममात्रं संस्कृतपाठकेन्द्रमस्तीति न अपितु कम्प्यूटरैराधुनिकैश्च यन्त्रैः शिक्षा प्रदीयते । संस्कृत-पालि-शिक्षा नवीनरीत्याऽनुदिनं परिवर्धते । संस्कृतप्रियजनै उपरहारदानैः तथा अनेकसंस्थाभिः विहितोपकारैः सुकेन्द्रमेतत् परिपोष्यमाणमस्ति । प्रवासिभारतीयाः केन्द्रं प्रति प्रभूतं धनं प्रयच्छन्ति । धनमिदं छात्रहिताय छात्रवृत्तिरूपेण प्रदीयते । भारतात् तथा भारतसर्वकारादपि केन्द्रं प्रति सहायता समायाति । अभ्यागताचार्याणां नियोजने तथा ग्रन्थानां समुपलब्ध्यर्थं वहूनि धनानि प्रददाति। 2000 संवत्सरत अत्र पी.एच्.डि (Ph.D.) पाठ्यक्रमस्यापि सञ्चालनं प्रारब्धमस्ति। पातञ्जलयोगसूत्रमाधारीकृत्य आमरा नामा काचित् प्रथमा शोधकर्त्री जाता । सम्न्यङ्ग-सोमाबत-बामरूङ्गाः प्रभृतयः युवशिक्षकाः केन्द्रेण सह बद्धाः सन्ति । एते स्वशोधं देववाण्यामुपरि कृत्वा उपाधिमपि आप्नुवन् । अपि च चम्लोङ्ग-सर्फङ्नुकनाम विद्वान् संस्कृतस्योपरि वहुलेखान् थाय्यां विलेख्य इदानीं लब्धावसरोऽस्ति । काश्यां, दिल्यां, वडोदरायां, पुणेपुर्यां शान्तिनिकेतने वा थाइदेशात् छात्राः भारतं समागत्य संस्कृतशिक्षां गृह्णान्ति । अस्य श्लोकस्य वचनानुसारं प्रमाणीक्रियते यत् – नैकविधवैदेशिकाः, ये भारतं प्रति आगत्य स्वशोधकार्यम् चक्रुः । देववाण्यामुपरि वहिरपि शोधदिकार्यं प्रचलन् अस्ति । षडदर्शनं, वैदिकवाङ्मयं, गीतां, पुराणानि धर्मशास्त्रं चादि विषयमाधारीकृत्य अत्र शोधकार्यं नितरां शोभायमानमस्ति । 'कौङ्गो' नामक कोऽपि संस्कृतनिष्ठचित्त अस्ति, येन सुरवाणीमिमां संगणके निबध्य युगानुरूपां नवतां प्रदीयते।

थाइदेशे 'चूडालङ्कार' नामक नृपस्य नामानुसारं विद्यालय एकः विद्यमानोऽस्ति। अत्र प्राच्यभाषाविभागः शोभते, यत्र पुनः स्वतन्त्ररीत्या संस्कृतं सुशिक्ष्यते । विद्यालयेऽस्मिन् 'सक्स्त्री" चिरायुश्च' नाम्ना शिक्षकाः सन्ति । यैः क्षेमेन्द्रस्योपरि स्वशोधकार्यं सम्यक् प्रतिपादितम् । अत्र संस्कृतभारतीमाश्रित्यपि अधीयते । पुनश्च महामङ्कुटराजविद्यालयो यत्र बौद्धशुचिकेन्द्रमस्ति। अत्र संस्कृतमङ्गिभूतबौद्धशिक्षायामुपरि स्नातकोपाधिश्च प्रदीयते ।

एवं रूपेण थाइदेशे प्राचीनकालात् संस्कृते लेखनपठनादि कार्यं प्रचलति। अलङ्कृताऽलङ्कृतिभिर्मनोज्ञैः सुवृत्तैः नैकविधा अभिलेखमालाः विराजन्ते। तत्र प्रोम्रूङ्गप्रासादोऽस्ति, यत्र संस्कृतवाचिलेखामस्ति। मूलसंस्कृतमाश्रित्य बहुभिः सुधीभिः वहुग्रन्थाः थाय्याम् अनूदिताः । संस्कृतभाषया प्रभावितो भूत्वा थाइशब्दाः संस्कृतरूपवन्तः विभान्ति। लिपिर्लेखाविधिश्चादि द्वारा प्रभावितो भूत्वा नैके थाइशब्दाः स्वस्वरूपं आपुः । थाइदेशस्यास्य सर्वत्र नाम शास्त्राणि, दिशः, प्राचीनस्थानानि, विद्यालयाः, राजमार्गाः यन्त्राण्यादिनां च नामानि सुसंस्कृतप्रसूतानि । विशेषतया रामकथया प्रभावेन गृहाश्चापणराजमार्गाः परिव्याप्ताः सन्ति । कथ्यते प्राचीनकाले भारवर्षमध्यात् बहवः ब्राह्मणाः समागत्य थाइदेशस्य कम्बोजमाश्रित्य ऊषुः । एते एव निजसंस्कृतेः प्रसारं प्रचारं च चक्रुः। संस्कृतस्य तथा प्राधान्यं थाइदेशे अस्ति, यतः सर्वमपि पारम्परिककार्यं संस्कृतशास्त्रानुरीत्या विधीयते । सर्वत्र थाइदेशे रामायणस्य प्रबलः प्रभावः परिदृश्यते। काव्येषु, नाट्येषु, कलासु, शिल्पे, सुमूर्त्तौ, पुरातत्वयुक्तचित्रे, वीथ्यां, मन्दिरेषु च रामायणकथानुसारं वैचित्र्यं प्रदर्शितमस्ति। बहवः संस्कृतग्रन्थाः थाइभाषायामनूदिताः। यथा – कथासरित्सागर, मेघदूतं, हितोपदेशः, शतकत्रयं, रत्नावली, सौन्दरानन्दकाव्यं, योगसूत्रं, नाट्यशास्त्रं, वेताल-सुजातकालिनीतिकथाश्च । संस्कृत-थाइ-कोष एकोऽपि उपलब्धोऽस्ति। यः पाल्याङ्ग्लभाषाभ्यां सह एक विशालः कोषग्रन्थरूपेण विदितोऽस्ति। संस्कृतशास्त्रस्य चाणक्यनीतेः तथा मनुस्मृतौ प्रभावात् वहूनि सुभाषितानि अपि विरचितानि। नाम एते


©Indira Gandhi National Open University

संस्कृतमार्गस्यानुगामिन इति प्रमाणमपि उपलभ्यते। अत्र 2001 संवत्सरे शुभमईमासे 'Silpakorn University' इत्यत्र 'Sanskrit South-east Asia' इति विषयस्योपरि अन्तर्राष्ट्रियसम्मेलनमभवत् (International Conference)। तत्परं तत्रैव 2015 संवत्सरे केन्द्रेण 'षोडश विश्वस्तरीय संस्कृत सम्मेलन' (16th World Sanskrit Conference) आयोजितम् । तदा थाई-भारत-सर्वकारप्रहितैः दानैः भव्यं पञ्चतलात्मकं संस्कृतभवनं निर्मितम् । अतः कविः स्वमुखेन प्रकाशयति –

थाई-भारत-सर्वकारप्रहितैर्दानैस्तदा निर्मितं
भव्यं पञ्चतलात्मकं सुभवनं शुभ्रं शुभ्रं संस्कृतम् ।।[5]

- **बैङ्काक् इत्यत्र संस्कृतम्**

थाईदेशं भ्रमित्वा तस्य राजधानीं बैङ्काकनगरं प्रति कविः आगतवान् । अत्रागत्य 'थाचाङ्-क्षेत्रे'स्थितं तथा 1800 शतके निर्मितं राजप्रसादम् अपश्यत् । तत्रैव मरकतमयी बुद्धमूर्त्यपि विराजिता वर्तते । स्थानेऽस्मिन् रामकीर्त्तेः चित्ररूपवर्णनं सवत्र दरीदृश्यते । बौद्धस्थाने रामसंयोजनम् अतीव रम्ययुक्तं भवति। बैङ्काक् इत्यत्र वहुषु स्थलेषु बौद्धविहाराः परिदृश्यन्ते । स्थलेषु एषु पालिग्रन्थात् पठितः वेदमन्त्रोच्चारणोऽपि श्रुयते । बहवः दक्षिणभारतीया अपि आगत्यत्र निवसन्ति । अत्र 'Thai-Bharat Cultural Lodge' इत्यरूपेण आश्रमो एकः 'सत्यानन्द-मुनिवरपुरी' महाशयेन निर्मितोऽस्ति । थम्मासाते भारताध्यायकेन्द्रमपि (India Studies Centre) अवस्थापितमस्ति । बैङ्काक्-नगरेऽस्मिन्नपि संस्कृतस्य वातावरणं शोभायमानमस्ति । श्रीहरिहरगुर्वोः प्रेरणया अत्र गीताऽऽश्रम एकः सुसंस्थापितोऽस्ति । अत्र सप्ताहान्ते साधुजनानां मेलनमपि भवति । गीतगानं, भजनं कीर्त्तनञ्च प्रचलति तथा च छात्रेभ्यः छात्रवृत्तिः प्रदीयते ।

- **थाई-पूर्वोत्तरे संस्कृतम्**

पूर्वोत्तरथाईलैण्डेऽपि प्रासादेषु बौद्धभग्नांशाः राजन्ते । पूर्वोत्तरथाय्यामपि नैकत्र रामस्य कीर्त्तिः परिशोभितास्ति । संस्कृतस्य प्रभावः तथास्ति यदर्थमत्र रामपुत्रस्य नाम्ना अत्र एका शुचि 'लवपुरी' वर्तते । इतोऽपि 'विष्णुलोकः' नामक लघुनगरमस्ति । थाईदेशे सुराबुरी नामक एका दिव्या नगरी अस्ति, यत्र श्वेतशैलस्योपरि मारुतिदीर्घकायः हस्ते गिरिं धृत्वा स्थितोऽस्ति । थाईदेशस्य पूर्वोत्तरदिशायां सर्वत्र हिन्दुधर्मस्य प्रभावः दृश्यते । अत्र शिव-विष्णु-रामादिनां मन्दिराणि संदृश्यन्ते । ततः परं कविना थाइदेशस्य 'च्याङ्माई' नगरं दृष्टम् ।नगरीयं नैकैः शैलै अभिरामा वर्तते । अत्र प्रख्यातमेकं शैलश्रुङ्गमस्ति । शैलेऽस्मिन् 'फूफिङ्' नामा राजप्रसाद एकोऽस्ति, यस्मिन् शैत्यकाले निवासः सुखकरो भवति । बौद्धदेवालयानां प्राचीननगरी इयम् । पूर्वोत्तराञ्चलथाईदेशस्य रीति-नीति-परम्परा सर्वापि भारतदेशेन साकं संबन्धितास्ति। पुराणधर्मशास्त्राद्यनुरीत्या संस्कृतिश्च विहिता इति शोभते ।

---

[5] वैदे.म. – ७.८०


©Indira Gandhi National Open University

- **मलेशियायां संस्कृतम्**

एसिआ महादेशस्य दक्षिण-पूर्वभागे अवस्थितं मलेशिया नगरम् । थाइदेशस्यानन्तरं नाम एकवर्षस्यानन्तरं 1999 संवत्सरे मलेशियायाः राजधानीं 'कुआला-लुम्पूरं' (Kuala Lumpur) इति स्थाने 'रामायणमहाभारतयोराश्रितं सम्मेलने' (1st International Ramayana-Mahabharata Conference) योगदानार्थं यात्रामकरोत् ।

संस्कृतस्य वहुलो प्रभाव इति कारणात् सम्मेलनस्यास्य सन्ध्याद्वये रामादिकथानिबद्धानि सांस्कृतिकगीतान्यपि आयोजितानि । आयोजकेषु बहवः दक्षिणभारतीयाः आसन् । सम्मेलनमिदं प्रसिद्धे मलयविश्वविद्यालये नियोजितमासीत् । सुदूरे अत्र रामगुहाऽपि विद्यते, यत्र काष्ठमृदा वा रामायणस्यान्तर्गताः प्रतिमाः शोभन्ते । तत्र शयानः कुम्भकर्णस्य विशाला मूर्त्तिः निर्मितास्ति । यस्याः पार्श्वे अनेके भटाः तस्य निद्रां भङ्क्तुं परितो अटन्तः सन्ति। एवं रूपेण सुगर्वितः सिंहासनारूढः दशाननस्य पार्श्वे सुवीरो हनुमानः स्वलाङ्गूलेन सह विराजमानोऽस्ति । सीतावियोगः, उटजनिवासः तथा च बालकृष्णस्य कालियानागफणैः नृत्यति इति सर्वमपि पौराणिकचित्रं सन्निविष्टं दृश्यते ।

- **इण्डोनेशियायां संस्कृतम्**

मलेशियाबत् इण्डोनेशियायामपि (हिन्देशिया) "द्वितीय अन्तराष्ट्रिय-रामायण-महाभारत सम्मेलनम्" अभूत् । इण्डोनेशियायाः वाली नामके प्रदेशे उदयन विश्वविद्यालयः विद्यते । विश्वविद्यालयेऽस्मिन् सम्मेलनमिदमभूत् । अस्य विश्वविद्यालयस्य प्रवेशद्वारस्य सम्मुखे भगवतः गणेशस्य मूर्त्तिरेका विराजमानास्ति । अत्रैव भारतशासनेन सुरवाण्याः कृते पीठमेकं निर्मितमस्ति । रामायणं तथा महाभारतमाश्रित्य सम्मेलनमिदं त्रिदिनीयमासीत् । पौराणिकाः विष्णुशिवादयः भगवन्तः मन्दिरेषु अत्र विराजिताः। नाम मन्दिराणि बाली-प्रदेशेऽस्मिन् हिन्दुधर्मेण प्रभावितानि ।

- **सिङ्गापुर-सौन्दर्ये संस्कृतम्**

सिङ्गापुरेऽपि संस्कृतस्य प्रीति अभूतपूर्वाऽस्ति । एकदा श्रीरामकृष्णाश्रमसन्निधानं एकः सत्सङ्गमः जातः । अत्र बहुदर्शनानां, गीतायाः च वहु चर्चा अभूत् । गीतारस आधुनिककालेऽपि सर्वेषां कृते अमृततुल्यः प्रतिभातीति अस्मादेव परिज्ञायते । परं सिङ्गापुरस्य विविधपर्यटस्थलानां दर्शनं च जातम्। सिङ्गापुरेऽस्मिन् नैकविधस्थलेभ्यः जना आगत्य निवसन्ति । अतः कविः सिङ्गापुरं सार्वजनीनराष्ट्रमिति उद्घोषयति । यथा वैदेशिकाटनमहाकाव्ये प्रतिपाद्यते –

सिङ्गापुरं सार्वजनीनराष्ट्रं
विभिन्नदेशीयजनैः सुपूर्णम् ।
अस्त्येशियारत्नमनन्तकान्तं
स्वर्गीय-सौन्दर्य-प्रतीकभूतम् ।।[6]

---

[6] वैदे.म. – १३.२०


©Indira Gandhi National Open University

- **जापान –इत्यत्र संस्कृतम्**

2009 संवत्सरे जापानदेशस्य कोटा इत्यत्र "14th World Sanskrit Conference" –इति सम्मेलनं समायोजितम् । जापानदेशस्य क्योटोपुरे समायोजिते सम्मेलनेऽस्मिन् योगदानार्थं देशान्तरेभ्यः समागतानां सुसंस्कृतज्ञानसुभासितानां कौटुम्बिकमेलनम् अभूत् । केवलं वृद्धजनाः न अपितु सुविज्ञाः युवानस्तरुण्योऽपि योगदानमकुर्वन्। मनीषिभिः शैक्षिकसत्रवर्गाणाम् उद्धाटनं कृतम् । परञ्च पञ्चदिनात्मकसम्मेलनेऽस्मिन् प्रश्नोत्तराणि विचारचर्चाश्च प्रारब्धा । कवीनां शास्त्रार्थपरम्परा चचाल । सत्कविभिः सुरम्या नवाः रसाद्राः कविताः सुश्राविताः । 1901 संवत्सरे जापानदेशस्य राजधान्यां 'टोक्यो' (Tokyo) इत्यत्र संस्कृतपीठस्य स्थापना अभूदीति वैदेशिकटनमहाकाव्ये प्रमाणीक्रियते –

एकोनविंशैकशते हि वर्षे
जापानदेशस्य हि राजधान्याम् ।
सुस्थापितं संस्कृतपीठमुच्चं
टोक्योस्थिते ज्ञानविशालकेन्द्रे ।।[7]

अस्य संस्कृतपीठस्य वरिष्ठाधिकारीरूपेण 'ताकाकुसुर्नाम'सुविद्वान् अधिष्ठितोऽभूत् । परं अन्येऽपि देववाण्याः सेवार्थमनुलग्नाः अभवन् । अयं विद्वान् पुरुषः संस्कृतस्य विविधशास्त्रमधीकृत्य ज्ञानं बभार। विंशशताब्दकालस्य पूर्वार्धके अनेनैव उपनिषदसमूहाः जापानवाण्याम् अनूदिताः । टोक्योस्थिते (Tokyo) ज्ञानगृहे हस्तैः लिखिताः सुलेखाः शोभन्ते । प्रायः बौद्धधर्माश्रित्य कथाः विद्यमानाः भवन्ति । एवं बौद्धविद्यासम्बद्धानि अनेकानि केन्द्राणि विलसन्ति । क्योटोपुरे 'ताउजि' नामकैकं मन्दिरञ्चास्ति । यत्र चतस्रः बोधसत्वप्रतिमाः मन्दिरञ्चास्ति । यत्र चतस्रः बोधिसत्वप्रतिमाः बोधिसत्वप्रतिमाः विराजिताः सन्ति । द्वादशरक्षकाणां सुमूर्त्तयः सन्ति । बास्तुकलाप्रतीकं विशालं भवनं विद्यते । एवं जापानदेशे सर्वत्र संस्कृतस्य प्रभावः परिलक्ष्यते ।

- **काम्बोडियायां संस्कृतम्**

'Sanskrit Studies Centre, Silpakorn University' इत्यस्य आमन्त्रणे 2015 संवत्सरे बैकाँक (Bangkok) इत्यत्र 16th World Sanskrit Conference आयोजितम् । तदनन्तरमनेन 'कम्बोडियां' प्रति सांस्कृतिकयात्रा कृता । षष्ठ्याः शताब्द्या इह द्वादशान्तं कम्बुजायां सुसंस्कृतं नाम राष्ट्रभाषा बभूव । स्थानेऽस्मिन् त्रिशताधिकानि प्राचीनमन्दिराणि सन्ति । ब्रह्मा, विष्णुः, शिवः बौद्धश्चादि देवाः सर्वत्र मन्दिरेषु विराजिताः सन्ति । 'अंकोरवाट-स्थलं' इत्यत्रापि मन्दिराणि दृष्टानि । अत्र संस्कृतस्य प्रभावः वहु प्रतिभाति । शिलाखण्डेषु रामायणमहाभारतयोः गाथा सुवर्णिता प्राप्यते। रावणेन सह भगवतः रामचन्द्रस्य युद्धं, सुबालिसुग्रीवयोः युद्धं, कर्णार्जुनयोः रणकौशलं, भीष्मस्य शरनिर्माता शैया, कृष्णेन गोवर्धनधारणं, युद्धेऽर्जुनीयं रथवाहनं, पार्थस्य शत्रुषु बाणवर्षा, देवदैत्यानां मध्ये शेषनागस्य रज्जोर्हठकर्षणपूर्वकं सागरमन्थनं, अप्सरसां तथा देवगणानां वर्णनं, इन्द्रलोकस्य नैसर्गिकचित्रं, यमलोकस्य करालरूपं, यक्षराज्ञः वर्णनं गजयूथराज्ञः वर्णनं वा अत्र शोभन्ते ।

---

[7] वैदे.म. – १८.१८


©Indira Gandhi National Open University

'बैन्तेयसाम्रे' इति एकं सिद्धं सुमन्दिरं चास्ति। 'ताप्रोम' नाम्ना प्राचीनं मन्दिर, यस्य मूलेषु विस्तारवतां तरूणां तथा पाषाणगृहाणां मेलः संदृश्यते । एवं नैकत्र अनेके विशालाः प्रतिमाः जीर्णाः त्रुटिताश्च । अस्य संरक्षणादि कर्त्तव्यं भारतस्य विज्ञैर्विभागीयजनैर्विधेमेव । अत एवात्र भारतशासनेन निर्माणसंरक्षणयोः कार्यं प्रवर्तितमस्ति। एतेषां संरक्षणाय तथा विश्वहिताय महान्निधिः धार्योऽस्ति। संस्कृतं तथा संस्कृतिः सर्वत्र विलसतु इत्यपि आशा। ततश्च तृतीये दिने कम्बुजराजधानीं 'नोमपेन्हं' प्रति सांस्कृतिकयात्रा कृता। पुनश्च चतुर्थे दिवसे कविः स्वदलेन साकं सुराजप्रासादं विलोकनाय गतवान् । प्रासादस्य प्राङ्गणे बुद्धगृहं च शोभते । एवमेव नगर्यामस्यां बुद्धमूर्त्तय अपि विराजते।

## आफ्रिका-महादेशे संस्कृतम्

- **मौरिशस-मेलनानुसारं संस्कृतम्**

रामायणं महाभारतं चाश्रित्य पूर्वं द्विवारं 'International Sanskrit Conference' अभूत्। सम्मेलनमिदं तृतीयवारं आफ्रिकामहादेशस्य सुमङ्गले मौरिशसे देशे (Mauritius, Island, Southeast coast of Africa) ख्री.पू. 2002 संवत्सरे सञ्चालितम् । मौरिशसदेशः लघुभारतमिव प्रतिभाति । किञ्चात्र तादृशी संस्कृतिः तथा फ्रांसीयवाग्, भोजपुरी हिन्दी च भाषा भूषा च परिलक्षितास्ति । संस्कृतस्य तथा तस्य संस्कृतेः प्रीतिः सर्वत्र मौरीशसे प्रस्फुटितमस्ति। स्थानस्यास्य 'सुसंसद्' (Parliament) रामायणम् उच्चतमं मत्वा ख्री.पू. 2001 संवत्सरे मईमासस्य 22 दिनाङ्के अभिनन्द्यकार्यम् अकरोत्। संसदि 'राष्ट्रियकाव्यं रामायणम्' इति विधेयकं पारितम्।

एतदेकं जाज्वल्यमानं निदर्शनं विश्वस्य मध्ये प्रसृतम् । परं रामायणं राष्ट्रियकाव्यमिति उद्घोषितम् । पुनश्च अत्र मौरिशसे रामायणस्य प्रसाराय रामायणकेन्द्रमेकं निर्मितमासीत्। रामायण महाभारतञ्चाश्रित्य जातं तृतीयं सम्मेलनमिदं त्रिदिनात्मकम् अभूत्। प्रथमे दिने वैदिकमन्त्रगानेन तथा दीपप्रज्वलनेन सम्मेलनस्य उद्घाटनं जातम् । सम्मेलनेऽस्मिन् अष्टवर्गेषु विभाजितानि सत्राणि चालितानि । सन्ध्यासमये मौरिशसदेशस्य प्रधानमन्त्रीमहोदयोऽपि समागतः। संस्कृतं प्रति प्रधानमन्त्रीमहोदयस्यापि रुचिः वहु आसीत्।

अत्र पौराणिकसम्बन्धीयाः सर्वेऽपि विषयाः परिदृष्टाः । नैकविधदेवाः मन्दिराणि च दृष्टानि । अनेन पञ्चमुखः गणेशः, विपुलः कृष्णवर्णः, गङ्गातलाबः परीतलाबश्च परिदृष्टः। अपि च 'गान्धी-प्रतिष्ठान' नाम्ना ट्रस्टं एकमस्ति, यत्र अनेके हिन्दुहर्म्यसभाः विराजिताः सन्ति।

## अमेरिकामहादेशे संस्कृतम्

- **पश्चिमामेरिकायां संस्कृतम्**

द्विसहस्रवर्षे (2008) संयुक्तराष्ट्र-अमेरिकायां संस्कृतमधिकृत्य एका व्याख्यानमाला अनुष्ठिता। या व्याखानमाला अमेरिकायाः बर्केली इत्यत्र स्थिते सुप्रसिद्धे केलिफोर्न्याऽऽख्य-विश्वविद्यालये (California University, Berkeley, USA) समायोजिता अभूत् । एकोनविंश-शतकस्यान्तिमभागे प्रायः संस्कृतपाठशिक्षा प्रारब्धा । पुरातनं पीठमिदं संस्कृततीर्थमिव प्रतिभाति । अत्र अध्यापने शोधकार्ये च मनीषिवर्या अभिनवयुक्ताः भवन्ति । तदा अभ्यागताचार्यपदेन 'श्रीरामशर्माकरः' अधिष्ठितोऽभूत्। 'रोबर्ड-प-गोल्डमैन' नामक विद्वान् सुसंस्कृताचार्यपदे


©Indira Gandhi National Open University

नियुक्तोऽभूत्। अयं तावत् रामायणज्ञः तथा सुवर्णपुरुषः । रामायणस्य आङ्ग्लभाषान्तरयोजनायाम् अस्य प्रख्यातिः विस्तृतास्ति । अस्य पत्नी 'शैलीति' नाम्नी, रामानुगता सीतेव नाम इयमपि सुसंस्कृतज्ञा सुरवाक्प्रवक्त्री। काव्ये, श्रुतौ व्याकरणे च गतेरस्याः शोभते । पुनश्च ततः बर्कलीस्थित बार्ट नाम स्थलं प्रति अव्रजत् । संस्कृतस्य प्रभावः तथास्ति यत् रामायणस्य बालकाण्डात् सर्वमपि सटिप्पण्या सह अनुवादं कृतमस्ति । इतोऽपि पुस्तकानां भाषान्तरणं प्रवर्तते । 'University of California, Los Angeles, U.S.A' इत्यत्र सम्मेलनमिदम् अभूत् । 'California University' इत्यत्र एकः विशालः ग्रन्थालयः विद्यते । यत्र वहूनि संस्कृतपुस्तकानि संदृश्यन्ते ।

- **पूर्वामेरिकायां संस्कृतम्**

अमेरिकादेशस्य नूर्जक-प्रदेशे सर्वत्र हरिच्छविः प्रतिफलितास्ति। ग्रीष्मकालेऽपि द्रुमाः लताः घासतृणावृताः सन्ति। अत्र दक्षिणभारतीयैः श्रीवेङ्कटेश्वरस्य मन्दिरं सञ्चालितमस्ति । तस्य दर्शनार्थं सहर्षेण सह कविः तत्र गतवान् । नाम वेङ्कटेश्वरस्य महिमा सर्वत्र विराजितास्ति । अत्रापि 'इस्कौन' धर्मस्य नाम कृष्णध्वनिं वहुधा श्रुयते । सायं जनसङ्कुलप्रदेशे कीर्तनघोषः समायोज्यते । "हरेः राम हरे च कृष्णः" ध्वनिः सवाद्यं गीयते । एवं सर्वमपि सांस्कृतिकयात्रापथं दृष्ट्वा संस्कृतस्य मार्गम् अन्वेषितम्। संस्कृतस्य औन्नत्यर्थं प्रवासिभारतवासिजनानां प्रचेष्टया न्यायालयादेशप्रभावहेतोः संस्कृतं पाठनाय व्यवस्था परिकल्पितास्ति । पञ्चदशात् (1500) ख्रिष्टाब्दत अत्र संस्कृतशिक्षणं प्रचलन्नस्ति । भव्यगृहे प्रसक्तः ग्रन्थालयश्च विद्यते, यः सुपुस्तकैः शतपत्रैश्च समृद्धोऽस्ति ।

अत्र पेन्सिलवेन्याप्रदेशे फिलाडेल्फियायां (Pennsylvania University) अस्ति । यस्य परिसर अनेकैः शिक्षाकेन्द्रैः भरितः । अनेके भाषाश्च पाठ्यन्ते । संस्कृतवाङ्मयस्य शास्त्रं, काव्यं पुरामित्यादि विषया अध्याप्यन्ते। प्रयोगशैल्या तथा उपकरणशतैश्चात्र शिक्षा प्रदीयते । अवकाशे अनुभविजनाः भारतम् अन्यदेशं वा प्रेष्यन्ते । प्राग्कालात् संचालिते विभागेऽस्मिन् इदानीं संस्कृतस्योपरि शोधकार्यमपि क्रियते। संस्कृतस्यौन्नत्यर्थं गोष्ठी सम्मेलनं चादि आयोज्यन्ते। प्रमाणस्वरूपम् इहेव '6th World Sanskrit Conference' अभूत् । संस्कृतविद्वान् दक्षः 'देवेन् पटेलः' तत्र संस्कृतं पाठ्यमानोऽस्ति । 'जार्ज कार्डोना' नाम पण्डितः, यः शब्दशास्त्रे निष्णातो बभूव । स्वरुचिर्वशात् भारतमागत्य पाणिनीये विधाने विद्यां गृहीत्वा स्वपाण्डित्यं लब्धचकार । नाम इतः ज्ञायते यत् वैदेशिकानां संस्कृतं प्रति कीदृशः प्रेमः वर्तते । यतः ते भारतमागत्य संस्कृतमध्ययनं कुर्वन्तः सन्ति। इदानीं न्यूयार्क इत्यत्र केलिफोर्न्यायाः अपेक्षया कोलम्बियायां संस्कृतशिक्षा अधिकतरा विलसति ।

- **संयुक्त – राज्य – संसरणे संस्कृतम्**

मुख्यस्थलराजमार्गे संयुक्तराष्ट्रस्य विश्वसंघोऽस्ति । यत्र अनेकदेशैः सुधृताः सुरम्याः ध्वजाः विलसिताः सन्ति। तस्यैव पार्श्वे भारतस्य भव्यः कार्यालयः विद्यते। त्रिवर्णराष्ट्रध्वजश्च शोभते। सुमानवानामधिकारघोषरूपकस्य संयुक्तराष्ट्रस्य यत् लेखपत्रम् अस्ति तत्सर्वम् आङ्ग्ले लिखितं पुरस्तात् नैकासु भाषासु ह्यनूदितमस्ति । तत् सांप्रतं संस्कृतभाषयापि सर्वम् अनूदितं मुद्रितञ्चास्ति ।


©Indira Gandhi National Open University

प्रायः सर्वेऽपि अत्र संस्कृतप्रिया आसन् इति परिज्ञायते, यतोहि अस्य गीतिगानं निशम्य आचार्याः शोधविद्यार्थिनश्च हृष्टास्तुष्टाः अभवन् । तदनु शिक्षकैः साक्षात्कारः विहितः । अत्रत्यविभागे पुस्तकस्यालयः, पठनविधयः कक्षाश्च परिदृष्टाः भवन्ति । भव्यतमं पुरमिदं (वाशिंगटन) संयुक्तराज्यस्य राजधानीरूपेण सुविदितमस्ति। पुरा कोलम्बसयात्रिणा सायासशोधैः तथा कठिनश्रमेण स्थानस्यास्य अनुसन्धानम् अकरोत् । कालक्रमेण पश्चात् विकाशं संप्राप्य अमेरिकानामविशालदेशः सुजन्म लेभे, अस्य राजधानी 'वाशिंगटन 'इति। अत्र पूर्वं 'दासवृत्तिः' परिचालिता आसीत् । अस्य कुदासवृत्तेः प्रखरः विरोधी तथा उद्धारकः 'अब्राह्मलिङ्कन्' राष्ट्रपतिर्बभूव । अस्य स्मरणे अत्र लिङ्कनस्य विशाला मूर्त्तिरेका स्थापितास्ति । बृहत्तमं शक्तिकेन्द्रं च दृष्टम्। अमेरिकायाः पेण्टागनं नाम सुसैन्यरक्षाभवनमपि इक्षीतम् । महान् पुराण एकः ग्रन्थालयोऽस्ति । नव्यार्कपुरे (New York) स्थितं सुसङ्ग्रहागारं द्रष्टुं शक्यते । कथं सृष्टिः जनिता ? कथं ब्रह्माण्डोऽयम् उद्भवः ? तत्सर्वमपि चित्राङ्कनैः दर्शितमत्र । खगोल-भूगोल-भूगर्भविज्ञान-मृदादिरूपं सर्वमपि प्रदर्शितमस्ति। एकत्र कक्षे सुभीमकायः डायनसोरश्च दृष्टः । वृहत् प्रख्यातविश्वापणकेन्द्रं (World Trade Centre) अवलोकितम् ।

'बोस्टन' नामके पुरे 'हार्वर्ड विश्वविद्यालयः' (Harvard University) विद्यमानोऽस्ति । अत्र 'Harvard Oriental Series' विद्यते, यत्र प्राच्यसंस्कृतपुस्तकानां प्रकाशनं कृतमस्ति । एशियानामयुतविभागेऽस्मिन् दक्षाः सुसंस्कृतज्ञानयुक्ताः बुधाः सन्ति । इतोऽपि पुरेऽस्मिन् तकनीकयुक्तं संस्थानमेकम् अस्ति । अग्रे गत्वा होस्डेल-पुरे Himalayan Institute नाम्नी संस्था दृष्टा भवति। विदेशेऽपि स्वदेशवस्तुनः प्रभावः सदृशः 'राम' इति नाम हिमालर्षिगुरुः संस्थानमिदं स्थापयाञ्चकार। तत्परं तस्य शिष्यः प्रवीणः राजमणिः भारं क्षमतां च बभार । अयं जनो अध्यात्मविद्याविषयान् गृहीत्वा आङ्ग्लगिरा प्रभृतान् ग्रन्थान् लिलेख। ध्यानाय, योगाय, तन्त्रहेतोश्चायुष्यवेदागदर्शनाय तथा च संसारिणां स्वास्थ्यरक्षणाय स्थानमिदं सर्वदा वरदानस्वरूपं विद्यमानमस्ति । वैदेशिका आधुनिकाः मानवाः स्वमानसशान्तिहेतोः तथा शुद्धात्मिकज्ञानविवर्धनाय अत्र समायान्ति । संयुक्तराज्येऽस्मिन् वसता कविना संस्कृतभारत्याः वैश्विकरूपं च परिदृष्टम् । निःस्वार्थसेवाकरणे रतानां मण्डलमेकमत्र शोभायमानोऽस्ति । संस्कृतमाध्यमेन सम्भाषणं, पठनं पाठनं च प्रवर्तते। एकदा Pennsylvania University, Philadelphia इत्यस्य संस्कृतविभागे संस्कृतमाध्यमेन शुभा संस्कृतवस्तुबद्धा गोष्ठी एका परिचालिता । श्रीमिथिलाप्रसादः, अरविन्दो शर्मा हरिदत्त शर्मा च त्रयः विद्वांसः तथा अन्ये त्रिंशद् दृढनिष्ठलोकाः सुगम्भीरसुभाषणानि अददुः। शास्त्रेषु काव्येषु विभिन्नवस्तून्यालम्ब्य चर्चा विहिता। संस्कृतशिक्षणाय नैकाः कक्षारपि परिचालिताः भवन्ति । केवलं प्रोढा इति न अपितु बालानां कृतेऽपि सुबालकेन्द्रेषु कक्षा प्रदीयते । तत् बालकेन्द्रं प्रति शर्मामहोदयोऽपि एकदा आमन्त्रितः । तत्र बालानां कक्षाः, प्रहृष्टाः अध्यापकाश्चात्रगणान् च अपश्यत्। छात्राः तत्र स्वकौशलेन संस्कृतेन पद्यान्यपि रचयन्ति। सर्वमपि दृष्ट्वा कविः स्वयमपि प्रसन्नतापूर्वकं समेषां मनस्तोषकरं शुभभाषणं गीतं च गीतवान् ।

एवं रूपेण देशविदेशेषु संस्कृतस्य मूल्यबोधः पूर्वं बभूव, इदानीम् अस्ति, अग्रे च भविष्यतीति प्राच्याः चिचितुः । पाश्चात्याश्च चेतन्ति ।


©Indira Gandhi National Open University

## उपसंहारः

विशेषतया एशिया तथा युरोपमहादेशस्य विभिन्नानुष्ठानेषु संस्कृतस्य भारतीयसंस्कृतेश्च सम्मानं शोधपत्रस्यास्य सिंहभागः। प्रादेशिकभाषा अपि इदानीं संस्कृतस्य बलेन सुसमृद्धा तथा सम्बर्धिताः भवन्ति । विज्ञानस्य तथा आधुनिकजीवनस्य विविध व्यवसायोद्योगकलाकौशलादिषु च संस्कृतस्य शरणमेवाभीष्टमार्गः । यतः संस्कृते अनेकविधं तत्त्वमन्तर्निहितमस्ति। केवलं अनुसन्धानं साग्रहं करणीयम्। एतन्मनसि निधाय विदेशेषु संस्कृतस्योपरि गवेषणादि कार्यं कथं प्रचलति तथा अस्याः देवभाषायाः महत्वं दिनानुदिनं कथं परिवर्धते इति सर्वमपि विषयमत्र स्पष्टतया उल्लिखितं वर्तते । कवेः वचनानुसारम् आधुनिककाले संस्कृतकाव्ये ये नवाः प्रयोगाः सम्प्रवृत्ताः, तेष्वन्यतमोऽयमपि प्रयोगः । नवे युगे नवतायां न कोऽपि दोषः । काव्यमनुसरति शास्त्रम् । अतः अस्याः रचनायाः परवर्तिनी समीक्षाऽपि नवीनदृष्ट्या भविष्यतीति मे आशयः।

## संन्दर्भग्रन्थ सूची

1. वैदेशिकाटनं महाकाव्यम् – प्रो. हरिदत्तशर्मा, प्रकाशकः –रा.सं. संस्थानम्, नई दिल्ली
2. संस्कृत में विज्ञान एवं वैज्ञानिक तत्व, प्रकाशकः – संस्कृतविभाग, इलाहाबाद विश्वविद्यालय, इलाहाबाद
3. Sanskrit Studies Outside India, On the occasion of 10th World Sanskrit Conference, Bangalore, 1997, Published by: R.S.S., New Delhi – 110058
4. Bharati Agehananda, A functional analysis of Indian thought and its social margins, Chowkhamba Sanskrit Studies 36, Banaras, 1964
5. Man in the universe; some continuities in Indian thought: Berkeley: U. of California Press, 1966


©Indira Gandhi National Open University